स्थानिवद्भावः

अस्मिन् पाठे स्थानिवद्भावः नाम कः इति ज्ञास्यामः | आरम्भे प्रसङ्गः अस्ति शास्–धातोः  लोट्–लकारस्य 'शास् +  हि'; ततः सम्पूर्णरीत्या स्थानिवद्भावसम्बद्धचिन्तनं क्रियते |

शास्–धातुः,  शासु → शास् (परस्मैपदी, अनुशिष्टौ),  अदादिगणस्य जक्षाद्यन्तर्गणे अस्ति | शास्–धातोः हि–प्रत्यये परे किं कार्यं भवति इत्यस्य परिशीलनेन स्थानिवद्भावबोधनाय उत्तमः अवसरः  |

**शा हौ** (६.४.३५) =  शास्–धातोः स्थाने शा–आदेशो भवति हि–प्रत्यये परे | शा लुप्तप्रथमाकं, हौ सप्तम्यन्तं, द्विपदमिदं सूत्रम् | **शास इदङ्हलोः** (६.४.३४) इत्यस्मात् **शासः** इत्यस्य अनुवृत्तिः | अनुवृत्ति–सहितसूत्रम्— **शासः शा हौ** |

यथा—
शास् +  हि → **शा हौ** (६.४.३५) → शा +  हि → **हुझल्भ्यो हेर्धिः** (६.४.१०१) इत्यनेन झलन्तेभ्यः धातुभ्यशः हि–स्थाने धि–आदेशः →  शा +  धि → शाधि

अत्र प्रश्नः उदेति यत् किं सूत्रं प्रथमम् आगच्छेत्— **शा हौ** (६.४.३५) अथवा **हुझल्भ्यो हेर्धिः** (६.४.१०१) | अस्य अवगमनार्थं **स्थानिवदादेशोऽनल्विधौ** (१.१.५६) इति सूत्रं सम्यक्तया बोध्यम् |

क्रमः एतादृशः—
– **अन्यत्रान्यत्रलब्धावकाशयोरेकत्रप्राप्तिस्तुल्यबलविरोधः** इति भाष्यवाक्येन तुल्यबलविरोधः अस्ति | अतः **विप्रतिषेधे परं कार्यम्** (१.४.२) इत्यनेन परकार्यं भवेत् | **हुझल्भ्यो हेर्धिः** (६.४.१०१) इति परसूत्रम् |
– परन्तु **पूर्वपरनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीयः** इति परिभाषया परत्वात् नित्यसूत्रं बलवत् | अत्र बोध्यं यत् परसूत्रं परत्वादेव बलवत् भवति; तदपेक्षया पूर्वसूत्रं नित्यमस्ति चेत्, तदेव बलवत् भवति | अत्र परसूत्रं नित्यम् अस्ति न वा इति न द्रष्टव्यं; तस्य अवसरः परत्वात् जातः एव; अधुना पूर्वसूत्रमेव नित्यमस्ति न वा इति द्रष्टव्यम् |

अत्र **हुझल्भ्यो हेर्धिः** (६.४.१०१) पूर्वं भवति चेत्, अनन्तरं **शा हौ** (६.४.३५) इत्यस्य कार्यं सम्भवति वा; पुनः **शा हौ** (६.४.३५) पूर्वं भवति चेत्, अनन्तरं **हुझल्भ्यो हेर्धिः** (६.४.१०१) इत्यस्य कार्यं सम्भवति वा— इति परिस्थितिद्वयम् अस्माभिः परिशीलनीयम् |

**हुझल्भ्यो हेर्धिः** (६.४.१०१) इति परसूत्रं; तर्हि **विप्रतिषेधे परं कार्यम्** (१.४.२) इत्यनेन प्रथमं भवति चेत्—
शास् +  हि → **हुझल्भ्यो हेर्धिः** (६.४.१०१) इत्यनेन हि–श्ताने धि → शास् +  धि → अधुना **शा हौ** (६.४.३५) इति सूत्रस्य प्रवर्तनार्थं 'हि' नास्ति, अतः 'स्थानिवद्भावेन' अयं धि, 'हि–इव' भवितुम् अर्हति न वा इति चिन्तनीयम् |

**शा हौ** (६.४.३५) पूर्वं भवति चेत्—
शास् +  हि → **शा हौ** (६.४.३५) → शा +  हि → अधुना **हुझल्भ्यो हेर्धिः** (६.४.१०१) इति सूत्रस्य प्रवर्तनार्थं झल्–प्रत्याहारे स्थितः सकारः नास्ति, अतः 'स्थानिवद्भावेन' अयं शा, 'शास्–इव' भवितुम् अर्हति न वा इति चिन्तनीयम् |

तर्हि अत्र 'स्थानिवद्भावः' इत्युक्ते कः, इति द्रष्टव्यम् |

**स्थानिवदादेशोऽनल्विधौ** (१.१.५६) इति सूत्रे भागद्वयम् अस्ति—
१) आदेशः स्थानिवत् भवति | नाम स्थानिनि ये गुणाः सन्ति, ते आदेशे अपि उपस्थिताः भवन्ति |
२) कश्चन विधिः आदेशस्य अनन्तरं भवति चेत्, अपि च स च विधिः स्थानि–सम्बद्ध–अल्–वर्णम् आश्रित्य प्रवर्तनीयः इति चेत्, आदेशः स्थानिवत् न भवति |

अस्मिन् सूत्रे विधानम् अपि अस्ति (स्थानिवद्भावः); निषेधः अपि अस्ति (स्थानिवद्भावनिषेधः) | अतिदेशसूत्रम् अस्ति यतोहि यस्य (आदेशस्य) स्वभावः तथा नास्ति (स्थानी इव न), तस्य (आदेशस्य) स्वभावः तथा (स्थानी इव) अध्यारोप्यते | परिभाषा सूत्रमपि अस्ति, यतोहि स्वयं किमपि कार्यं न करोति; विधिसूत्राणां साहायं करोति—स्थानिवद्भावः यदि नाभविष्यत्, तर्हि कार्यं न स्यात् |

अनेन सूत्रेण, सामान्यतया आदेशः स्थानिवत् भवति | अष्टसु स्थलेषु स्थानिवद्भावः भवति | काशिकायाम् एतदर्थं वाक्यम् अस्ति **धात्वङ्गकृत्तद्धितताव्ययसुप्तिङ्पदादेशाः** | अनेन—

१) स्थानी धातुः अस्ति चेत्, तस्य स्थाने आदेशः अपि धातुः भवति |
२) स्थानी अङ्गम् अस्ति चेत्, तस्य स्थाने आदेशः अपि अङ्गं भवति |
३) स्थानी कृत्–प्रत्ययः अस्ति चेत्, तस्य स्थाने आदेशः अपि कृत्–प्रत्ययः भवति |
४) स्थानी तद्धित–प्रत्ययः अस्ति चेत्, तस्य स्थाने आदेशः अपि तद्धित–प्रत्ययः भवति |
५) स्थानी अव्ययम् अस्ति चेत्, तस्य स्थाने आदेशः अपि अव्ययं भवति |
६) स्थानी सुप्–प्रत्ययः अस्ति चेत्, तस्य स्थाने आदेशः अपि सुप्–प्रत्ययः भवति |
७) स्थानी तिङ्–प्रत्ययः अस्ति चेत्, तस्य स्थाने आदेशः अपि तिङ्–प्रत्ययः भवति |
८) स्थानी पदम् अस्ति चेत्, तस्य स्थाने आदेशः अपि पदं भवति |

तर्हि सामान्यतया आदेशः स्थानिवत् भवति |

स्थानिवद्भावः कुत्र न भवति ? येन एकः स्पष्टविचारः मनसि आगच्छेत्, त्रयः कालाः कल्पनीयाः |
- प्रथमकाले स्थानी अस्ति |
- द्वितीयकाले आदेशः अस्ति |
- तृतीयकाले कश्चन विधिः अस्ति |

विधिः नाम विधिसूत्रस्य कार्यम् | तर्हि अत्र कालत्रयस्य साधनार्थं सूत्रद्वयम् अवश्यम् अपेक्षितम् | प्रथमसूत्रेण स्थानिनः स्थाने कश्चन आदेशः विधीयते; अनेन स्थानी यः आसीत्, तस्य च स्थाने अधुना आदेशः आगतः | तदानीं द्वितीयसूत्रेण एकं नूतनं कार्यं विधीयते; इदं नूतनकार्यं तृतीयकाले भवति | अत्र तृतीयकालः विशेषतः अवलोकनीयः | अस्मिन् द्वितीयसूत्रे यानि निमित्तानि अपेक्षितानि, तेषु यदि एकमपि कश्चन 'वर्णः' ('अल्') अस्ति यः स्थानिनि आसीत् किन्तु साक्षात् आदेशे नास्ति, तर्हि इदं कार्यं भवितुं न अर्हति— यतोहि स च अल्–वर्णस्य स्वभावः आदेशे अध्यारोपयितुं न शक्यते, नाम अत्र स्थानिवद्भावः न सम्भावति | एतत् वदामः 'अल्–विधिः' | अतः सूत्रम् अस्ति **स्थानिवदादेशः अनल्विधौ** (१.१.५६) | आदेशः स्थानिवत् भवति; किन्तु तादृशः अल्–विधिः अस्ति चेत्, आदेशः स्थानिवत् न भवति |

एकम् उदाहरणं पश्यामः | **आर्धधातुकस्येड्वलादेः** (७.२.३५) इति सूत्रेण आर्धधातुकप्रत्ययस्य आदौ वल्–प्रत्याहारे अन्यतमवर्णः अस्ति चेत्, तस्य इडागमो भवति | तर्हि इदं कार्यम्, अयं विधिः, अवश्यम् अल्–विधिः अस्ति | अल्–आश्रितविधिः यतोहि तस्य निमित्तेषु अल्–वर्णः वर्तते—आर्धधातुकप्रत्ययस्य आदौ कश्चन वल्–प्रत्याहारस्थवर्णः भवेत्, इति कृत्वा अल्–विधिः |

लिख → **समानकर्तृकयोः पूर्वकाले** (३.४.२१) इत्यनेन क्त्वा → लिख् + क्त्वा → लिख् + त्वा → **आर्धधातुकस्येड्वलादेः** (७.२.३५) इत्यनेन त्वा वलादि–आर्धधातुकप्रत्ययः अतः तस्य इडागमो भवति → लिख् + इ + त्वा → लिखित्वा

अधुना यदि वि–उपसर्गपूर्वकं लिख्–धातुं स्वीकुर्मः—

विलिख् → **समानकर्तृकयोः पूर्वकाले** (३.४.२१) इत्यनेन क्त्वा → विलिख् + क्त्वा → **समासेऽनञ्पूर्वे क्त्वो ल्यप्** (७.१.३७) इत्यनेन समासे सति (धातोः पूर्वम् उपसर्गः अस्ति चेत् समासः) क्त्वा–स्थाने ल्यप्–आदेशः → विलिख् + ल्यप् → विलिख् + य → अधुना **आर्धधातुकस्येड्वलादेः** (७.२.३५) इत्यनेन इडागमो भवति वा ? य–प्रत्ययः वलादिः नास्ति; परन्तु 'त्वा'–स्थाने 'य' विहितः किल, अतः स्थानिवद्भावं कृत्वा अयं य–प्रत्ययः त्वा इव स्यात् | अस्य निर्णयार्थं द्रष्टव्यं यत् अस्माकम् आगम्यमानेन विधिसूत्रेण तादृशः अल्–विधिः इष्यते किम् ? **आर्धधातुकस्येड्वलादेः** (७.२.३५) इत्यनेन अल्–विधिः भवति एव; निमित्तम् अस्ति वलादि–प्रत्ययः | स च अल्–वर्णः (तकारः) स्थानिनि (त्वा–इत्यस्मिन्) आसीत् किन्तु आदेशे (य–इत्यस्मिन्) नास्ति अतः अत्र अल्–विधौ कर्तव्ये, स्थानिवद्भावो नास्ति | नाम त्वा–प्रत्ययस्य वलादित्वम् य–प्रत्यये आरोपयितुं न शक्यते | अतः इडागमः न भवति, रूपं भवति 'विलिख्य' |

अत्र अस्माकं त्रयः कालाः के ?

– प्रथमकाले स्थानी अस्ति क्त्वा ('त्वा')
– द्वितीयकाले आदेशः अस्ति ल्यप् ('य')
– तृतीयकाले कश्चन विधिः अस्ति इडागमः—**आर्धधातुकस्येड्वलादेः** (७.२.३५) ।

एतादृशं चिन्तनं सर्वत्र करणीयम् ।

शास्त्रे अयम् अल्–विधिः चतुर्प्रकारकः इति उच्यते । **स्थानिवदादेशोऽनल्विधौ** (१.१.५६) इति सूत्रे 'अल्–विधिः' इति एकः समासः; स च समासः चतुर्भिः प्रकारैः विग्रहवाक्यं कर्तुं शक्यते । 'अला विधिः' (तृतीयतत्पुरुषः), 'अलः विधिः' (पञ्चमीतत्पुरुषः), 'अलः विधिः' (षष्ठीतत्पुरुषः), 'अलि विधिः' (सप्तमीतत्पुरुषः) । इत्युक्ते अल्–विधौ— (१) अल्–द्वारा कार्यम्, (२) अल्–वर्णात् परं कार्यम्, (३) अल्–वर्णस्य स्थाने कार्यं (स्वयं स्थानी), (४) अल्–वर्णात् पूर्वं कार्यम् । उदाहरणाणि चत्वारि अपि दास्यन्ते । परन्तु मनसि एतावदेव बोध्यं यत् विधिसूत्रे यदि कुत्रचित् अल्–वर्णः निमित्तरूपेण अपेक्षितः अस्ति यः केवलं मूलस्थानिनि आसीत् अपि च आदेशे नास्ति, तर्हि स्थानिवद्भावनिषेधकत्वात् अयम् अल्–विधिः न भविष्यति ।

सम्प्रति **स्थानिवदादेशोऽनल्विधौ** (१.१.५६) इति सूत्रे 'अल्–विधिः' इति समासस्य चतुर्णां विग्रहवाक्यानां कृते एकैकस्य दृष्टान्तः दीयते—

१. अला विधिः (तृतीयतत्पुरुषः)

यदि स्थानिघटित–अल्–वर्णस्य द्वारा कश्चन विधिः कार्यः (तृतीये काले), तर्हि स्थानिनः स्थाने यः आदेशः आगतः द्वितीयकाले, सः आदेशः स्थानिवद्भावं न प्राप्नोति । अत्र बोध्यं यत् 'द्वारा' नाम स च वर्णः कार्यं प्रति निमित्तम् । किन्तु अपरेषु त्रिषु वक्ष्यमाणेषु दृष्टान्तेषु अयं वर्णः निमित्तं नास्ति किम् ? अस्त्येव । तर्हि अत्र 'अला विधिः', नाम 'द्वारा' इत्यस्य कथनेन कः अर्थः ? अर्थः एवं यत् निमित्तं सत्यपि तद्द्वारा पूर्वकार्यं न, परकार्यं न, अपि च स्वयं स्थानी न; अपि तु कथञ्चित् अन्यरीत्या निमित्तं, यथा कार्यस्थलात् दूरं भूत्वा निमित्तम् । अस्य च उदाहरणम् अत्र उच्यते—

**व्यूढोरस्केन** इति पदम् । विग्रहवाक्यम् अस्ति 'व्यूढम् उरो यस्य' इति कृत्वा बहुव्रीहिसमासः । अस्य पदस्य व्युत्पत्त्यर्थं समासप्रक्रियायां 'व्यूढम् + उरः' → प्रातिपदिकसंज्ञा, सुपः लुक् → व्यूढ + उरस् → **उरः प्रभृतिभ्यः कप्** (५.४.१५१) इत्यनेन उरःप्रभृत्यन्तात् बहुव्रीहेः कप्–प्रत्ययः → व्यूढ + उरस् + क → **आद्गुणः** (६.१.८७) इत्यनेन गुणः → व्यूढोरस् + क → पदान्तसकारस्य रुत्वविसर्गौ → व्यूढोरः + क → **सोऽपदादौ** (८.३.३८) इत्यनेन पदान्ते विसर्गस्य 'पाश–कल्प–क–काम्य' इत्येषु परेषु सकारादेशः → व्यूढोरस्क इति शब्दः → तृतीयाविभक्तेः एकवचनविवक्षायां टा–प्रत्ययः, तस्य स्थाने च इन–आदेशः, तदा गुणः → व्यूढोरस्केन → **अट्कुप्वाङ्नुम्व्यवायेऽपि** (८.४.२) इत्यनेन णत्वं स्यात् यतोहि रेफः इति निमित्तं वर्तते, ततः अग्रे नकारः अपि अस्ति → मध्ये स्थितः सकारः णत्वं प्रति बाधा किन्तु स च सकारः विसर्गस्थाने आगतः । विसर्गः अयोगवाहेषु अन्यतमः इति कृत्वा अट्–प्रत्याहारे परिगण्यते, अनेन च सकारे स्थानिवद्भावं कृत्वा अट्–प्रत्याहारे स्वीक्रियते चेत् णत्वं भवेत् । परन्तु अत्र विसर्जनीयः अल्–वर्णः; तस्य च कारणेन णत्वं भविष्यति अतः 'अला विधिः' इत्यनेन सकारे स्थानिवद्भावो न भवति । णत्वं च बाधितम् । **व्यूढोरस्केन** इति पदम् ।

२. अलो विधिः (पञ्चमीतत्पुरुषः)

परकार्यस्य दृष्टान्तः । स्थानीभूतात् अलः परं कार्यं विधीयमानम् इति चेत्, आदेशे स्थानिवद्भावो न भवति ।

दिव्–शब्दः + सु → **दिव औत्** (७.१.८४) इत्यनेन दिव्–इत्यस्य वकारस्य औत्–आदेशः → दि + औ + स् → **इको यणचि** (६.१.७६) → द्यौ + स् → 'औ' इत्यस्मिन् वकारस्य स्थानिवद्भावं कृत्वा **हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल्** (६.१.६७) इत्यनेन सकारस्य लोपः स्यात् → वकारः स्थानी, तस्य निमित्तत्वात् स्कारलोपः → अलो विधिः अस्ति चेत् स्थानिवद्भावो न भवति → द्यौः इतिपदम् ।

३. अलो विधिः (षष्ठीतत्पुरुषः)

स्थानीभूतस्य अलः स्थाने एव केनचित् विधिना इष्टं कार्यमस्ति चेत् तस्मिन् विधौ कर्तव्ये आदेशे स्थानिवद्भावो न भवति |

**द्युकामः** इति पदम् | कामयते इति कामः, दिवः कामः इति विग्रहस्य समासे कृते—

दिव् + काम → **दिव उत्** (६.१.१३१) इत्यनेन दिव्–प्रातिपदिकस्य (न तु दिव्–धातोः) वकारस्य उ–आदेशः → दि + उ + काम → **इको यणचि** (६.१.७६) → द्यु + काम → उकारस्य वकारस्थानिवद्भावं कृत्वा **लोपो व्योर्वलि** (६.१.६६) इत्यनेन उकारस्य लोपः स्यात् → अलः स्थाने विधिः भवति चेत् अलो विधिः इति कृत्वा स्थानिवद्भावो न भवति → द्युकाम इति प्रातिपदिकम् → प्रथमाविभक्तौ एकवचने द्युकामः सिद्धः |

४. अलि विधिः ( सप्तमीतत्पुरुषः)

अलि परे पूर्वस्य विधेः कर्तव्ये सति अल्–स्थाने आदेशस्य स्थानिवद्भावो न भवति |

क इष्टः | यज्–धातुः + क्त → यज् + त → **वचिस्वपियजादीनां किति** (६.१.१५) इत्यनेन सम्प्रसारणम् → इ अ ज् + त → पूर्वरूपैकादेशः → इज् + त → **व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः** (८.२.३६) इत्यनेन व्रश्च्, भ्रस्ज्, सृज्, मृज्, यज्, राज्, भ्राज्, छकारान्ताः शकारान्ताः चैषां धातूनाम् अन्तिमवर्णस्य स्थाने षकारादेशः → इष् + त → **ष्टुना ष्टुः** (८.४.४१) → इष्ट → एतस्मात् पूर्वं 'किम् + सु' → **किमः कः** (७.२.१०३) इत्यनेन किम्–शब्दस्य विभक्ति–प्रत्यये परे "क" आदेशः → क + स् → **ससजुषो रुः** (८.२.६६) → कर् + इष्ट → यज्–धातोः सम्प्रसारणेन निष्पन्नस्य इकारस्य यकारस्थानिवद्भावं कृत्वा **हशि च** (६.१.११४) इत्यनेन अप्लुत–ह्रस्व–अकारात् परस्य रुँ–सम्बद्धरेफस्य उकारादेशः हशि परे → 'क + उ + इष्ट' इति भवति स्म, परन्तु 'हशि परे' इत्यस्य कथनेन 'अलि विधिः' इति कारणतः इकाररूपादेशे यकरत्वस्य स्थानिवद्भावो न भवति → कर् + इष्ट → **भोभगोअघोअपूर्वस्य योशि** (८.३.१७) इत्यनेन अकारोतरस्य 'रु'–शब्दस्य रेफस्य यकारादेशः अशि परे → कय् + इष्ट → **लोपः शाकल्यस्य** (८.३.१९) इत्यनेन अपूर्वयोः पदान्तयोः वकारयकारयोः लोपः विकल्पेन भवति अशि परे → क इष्टः / कयिष्टः |

एतत्सर्वं मनसि निधाय, अधुना पुनः चिन्तनीयं यत् अत्र **हुझल्भ्यो हेर्धिः** (६.४.१०१) पूर्वं भवति चेत्, अनन्तरं **शा हौ** (६.४.३५) इत्यस्य कार्यं सम्भवति वा; **शा हौ** (६.४.३५) पूर्वं भवति चेत्, अनन्तरं **हुझल्भ्यो हेर्धिः** (६.४.१०१) इत्यस्य कार्यं सम्भवति वा— इति इदं परिस्थितिद्वयम् अस्माभिः परिशीलनीयम् |

**हुझल्भ्यो हेर्धिः** (६.४.१०१) इति परसूत्रं; तर्हि **विप्रतिषेधे परं कार्यम्** (१.४.२) इत्यनेन प्रथमं भवति चेत्—
शास् + हि → **हुझल्भ्यो हेर्धिः** (६.४.१०१) इत्यनेन हि–श्ताने धि → शास् + धि → अधुना **शा हौ** (६.४.३५) इति सूत्रस्य प्रवर्तनार्थं 'हि' नास्ति, अतः 'स्थानिवद्भावेन' अयं धि, 'हि–इव' भवितुम् अर्हति न वा इति स्थितौ → **शा हौ** (६.४.३५) इति सूत्रस्य प्रवर्तनार्थम् अल्–निमित्तं नास्ति अपि तु धातुः च प्रत्ययः च, अतः अत्र 'स्थानिवद्भावेन' अयं धि, 'हि–इव' भवति इति कृत्वा **शा हौ** (६.४.३५) इत्यस्य कार्यं प्रवर्तते एव | अनेन **शा हौ** (६.४.३५) पूर्वपरप्रसङ्गि, एतस्माच्च नित्यसूत्रं; नित्यत्वात् प्रथमं प्रवर्तनीयम् |

**शा हौ** (६.४.३५) तर्हि पूर्वं भवति एव—
शास् + हि → **शा हौ** (६.४.३५) → शा + हि → अधुना **हुझल्भ्यो हेर्धिः** (६.४.१०१) इति सूत्रस्य प्रवर्तनार्थं झल्–प्रत्याहारे स्थितः सकारः अपेक्षितः; स च सकारः स्थानिनि शास्–धातौ आसीत् किन्तु शा इति आदेशे नास्ति | अत्र अल्–निमित्तकः विधिः अस्ति | कीदृशः ? अलो विधिः, पञ्चमीतत्पुरुषः | एतस्मात् कारणात् शा–आदेशे शास् इति स्थानिनः सकारत्वं न आगच्छति | तदर्थं **हुझल्भ्यो हेर्धिः** (६.४.१०१) इति सूत्रं स्थानिवद्भावं कृत्वा न प्रवर्तनीयम् | अस्य किन्तु कार्यम् अत्र अपेक्षितमेव, तदर्थं च पाणिनिः इदं सूत्रम्, अपि च **शा हौ** (६.४.३५) इति सूत्रं, द्वयमपि **असिद्धवदत्राभात्** (६.४.२२) इति सूत्रस्य अधिकारे स्थापितवान् | अनेन च द्वयोः सूत्रयोः हि इत्यस्य समानाश्रये सति, **हुझल्भ्यो हेर्धिः** (६.४.१०१) इत्यस्य दृष्ट्या **शा हौ** (६.४.३५) इत्यस्य कार्यमसिद्धम् | शास् एव दृश्यते | अनेन **हुझल्भ्यो हेर्धिः** (६.४.१०१) इत्यस्य प्रसक्तिर्भवति, धि–आदेशश्च सिध्यति | शाधि इति रूपं जायते |

अतः अत्र महाभाष्यटीकावाक्यम् अस्ति **शाधीत्यत्रापि नित्यत्वात् पूर्वं शाभावः, अल्विधित्वाच्च धित्वे नास्ति स्थानिवद्भावः** |

**असिद्धवदत्राभात्** (६.४.२२) = कमपि आश्रयम् अधिकृत्य आभीय–कार्यं, द्वितीयं समानाश्रितम् आभीय–कार्यं प्रति असिद्धं भवति | अधिकारसूत्रम् | **भस्य** (६.४.१२९) इति अधिकारसूत्रेण भ–संज्ञा सम्बद्धकार्याणि भवन्ति षष्ठाध्ययस्य अन्तपर्यन्तम् | **असिद्धवदत्राभात्**

(६.४.२२) इत्यनेन ६.४.२३ इत्यस्मात् आरभ्य, **भस्य** इत्यस्य अधिकारस्य अन्तपर्यन्तम् (६.४.१७५), एषां कार्याणां नाम आभीय–कार्यम् | असिद्धवत् अव्यपदयम्, अत्र अव्यपदयम्, आ अव्यपदयं, भात् पञ्चम्यन्तम्, अनेकपदमिदं सूत्रम् | 'असिद्धवत्' इत्युक्ते 'यथा न अजनिष्यत' | सूत्रस्य विधानं जातं, कार्यञ्च सिद्धं; किन्तु अनेन सूत्रेण द्वितीयसूत्रं प्रति प्रथमस्य कार्यं 'यथा नाभविष्यत्' अतः 'असिद्धवत्' इत्युक्तम् | 'समानाश्रितं कार्यम्' इति अर्थः उदेति 'अत्र' इति अव्ययपदेन | अस्मिन् + त्रल् → 'अत्र' | 'अस्मिन्' इत्यस्य सप्तम्यन्तत्वेन निमित्तत्वम् इति आशयः | सूत्रं स्वयं सम्पूर्णम्— **असिद्धवत् अत्र आ भात्** |

अन्ततो गत्वा इदमपि धेयं— केनचित् एतादृशचिन्तनमपि भवितुमर्हति यत् वस्तुतस्तु **शा हौ** (६.४.३५) इत्यस्य आवश्यकता नास्ति | यतो हि इदं सूत्रं नास्ति चेत्, शास् + हि → **हुझल्भ्यो हेर्धिः** (६.४.१०१) → शास् + धि → **धि च** (८.२.२५) इत्यनेन सकारलोपो भवति धकारादौ प्रत्यये परे → शा + धि → शाधि | परन्तु त्रिपादिनः **धि च** (८.२.२५) सूत्रस्य असिद्धत्वं **शास इदङ्हलोः** (६.४.३४) इति सूत्रं प्रति | **शास इदङ्हलोः** (६.४.३४) इत्यनेन शासः उपधायाः इत् स्यात् अङि हलादौ क्ङिति च | शिस् + हि | यदनिष्टम् | एतस्य निवारणार्थं **शा हौ** (६.४.३५) इत्यस्य आवश्यकता | **शा हौ** (६.४.३५) इत्यनेन पूर्वं शा + हि इति भवति | तदा एव **हुझल्भ्यो हेर्धिः** (६.४.१०१) इत्यनेन धित्वम्; अनेन इष्टरूपं शाधि सिध्यति |

Swarup — August 2019